## हनो वध लिङि। (४२/२४३३)

हन्ते[1]र्धातोः वध इत्ययमादेशो भवति [2]लिङि परत [3]आर्धधातुके। वध्यात्, वध्यास्ताम्, वध्यासुः। अकारान्तश्चायमादेशः। तत्रा[4]कारस्य लोपो भवति (६.४.४८/२३०८)। तस्य स्थानिवद्भावाद् अवधीत् [5]इति हलन्तलक्षणा वृद्धिः (७.२.३/२२६७) न भवति[6] ॥

## लुङि च। (४३/२४३४)

लुङि च परतः हनो वध इत्ययमादेशो भवति। अवधीत्, अवधिष्टाम्, अवधिषुः। योगविभाग उत्तरार्थः। आत्मनेपदेषु लुङि विकल्पो यथा स्याल्लिङि मा भूत् ॥

## आत्मनेपदेष्वन्यतरस्याम्। (४४/२६९६)

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। आत्मनेपदेषु [7]परतो हनो लुङ्यन्यतरस्यां वध इत्ययमादेशो भवति। आवधिष्ट, आवधिषाताम्, आवधिषत। न [8]च भवति। आहत, आहसाताम्, आहसत[9] ॥

## इणो गा लुङि। (४५/२४५८)

इणः गा [10]इत्ययमावेशो भवति लुङि परतः। अगात्, अगाताम्, अगुः। लुङि इति वर्तमाने पुनर्लुङ्-ग्रहणम् [11]'आत्मनेपदेष्वन्यतरस्याम्' (२.४.४४/२६९६) इत्येतन्मा भूत्। इह त्वविशेषेण नित्यं च भवति। [12]अगात्। अगायि भवता।

[१६७] [13]इण्वदिक इति वक्तव्यम्। (म.भा. १.४८५)
अध्यगात्, अध्यगाताम्, अध्यगुः ॥

## णौ गमिरबोधने। (४६/२६०७)

णौ परतः इणोऽबोधनार्थस्य गमिरादेशो भवति। [14]इकार उच्चारणार्थः। गमयति, गमयतः, गमयन्ति। अबोधने इति [15]किम्? [16]प्रत्याययति। इण्वदिक (वा. १६७) इत्येव, अधिगमयति[17] ॥

## सनि च। (४७/२६१५)

[18]सनि परतः इणोऽबोधनार्थस्य गमिरादेशो भवति। जिगमिषति, जिगमिषतः, जिगमिषन्ति। अबोधने [19]इत्येव, अर्थान् प्रतीषिषति[20]। इण्वदिक (वा. १६७) इत्येव, अधिजिगमिषति। योगविभाग उत्तरार्थः। 'इङश्च' (२.४.४८/२६१६) इति सन्येव यथा स्यात्[21] ॥

## इङश्च। (४८/२६१६)

इङश्च सनि परतो गमिरादेशो भवति। अधिजिगांसते, अधिजिगांसेते, अधिजिगांसन्ते[22] ॥

---

1. धातोः नास्ति क.फ. 2. आर्धधातुके लिङि परत इ, लिङि . . . . आर्धधातुके नास्ति ह. 3. आर्ध–धातुके नास्ति क. 4. अतो लोपः क.इ.फ.ह. 5. इत्यत्र ड. 6. अतो हलादेर्लघोः इति इत्यधिकम् अ.ब.क.ड.इ.ग. 7. परतः नास्ति फ, हन्तेः इ. 8. चेह क. 9. 'आङो यमहनः' इत्यात्मनेपदम्। 'हनः सिच्' इति कित्वम्। 'अनुदात्तोपदेश' इति नलोपः। ह्रस्वादङ्गात् इति सिचो लोपः इत्यधिकम् क.ड.ह. 10. गाङ ब. 11. किम् इत्यधिकम् फ. 12. नास्ति ब. 13. इण्वदिका ह. 14. वाक्यमिदं नास्ति फ. 15. किमर्थम् इ. 16. अर्थान् प्रत्यापयति क.ड, प्रत्यापयति ब. 17. अधिगमयतः, अधिगमयन्ति इत्यधिकम् ब. 18. सनि च परतः क, सनि परतः नास्ति ग. 19. इत्येवम् ह. 20. प्रतिजिगमिषन्ति इत्यधिकम् फ. 21. णौ मा भूत् इत्यधिकम् क.ड.इ.फ.ह. 22. अच् झनगमां सनि इति दीर्घत्वं इत्यधिकम् ह.